श्रीः

श्री ५ मन्महाराजाधिराजमहेन्द्रवीरविक्रमसाहदेवानां

शुभराज्याभिषेकमहोत्सवे

# 'स्वागताभिनन्दनम्'

श्री चौ० फ़त्यजङ्गपराक्रमसाहस्य अध्यक्षतायां

पण्डितबुद्धिसागरशर्मणा

संपादितम्

प्रकाशकः— वीरपुस्तकालय',

नेपालकान्तिपुरीस्थः

१०:०। वि. सं. २०१३-१-२०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

श्री ५ मन्महाराजाधिराजमहेन्द्रवीरविक्रमसाहदेवानां

युवराज्याभिषेकमहोत्सवे

# 'स्वागताभिनन्दनम्'

श्री चौ० फत्यजङ्गपराक्रमसाहस्य अध्यक्षतायां

पण्डितबुद्धिसागरशर्मणा

संपादितम्

प्रकाशकः— वीरपुस्तकालयः,

नेपालकान्तिपुरीस्थः

१०००।

वि. सं. २०१३-१-२०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# नेपालसम्राट्

श्री ५ महाराजाधिराजमहेन्द्र-
वीरविक्रमसाहदेवः, यमाश्रित्य
नेपालः प्रतिदिनं विकासोन्मु-
खो दृश्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

# प्राक्कथनम्

श्रीमान् महेन्द्रवीरो जयति नरेन्द्रो युवा महोत्साहः ।
नेपालस्योन्नयने यस्य हि परितोऽस्ति संनाहः ॥
देशे देशे ख्यातिं विशदां प्राप्तोऽस्ति पुस्तकालयकः ।
देशोन्नत्या सार्द्धं कथमिव नास्योन्नतिर्न स्यात् ॥
साङ्गोपाङ्गैर्वेदैः कापिलयोगैस्तथागतैस्तन्त्रैः ।
नाट्यैतिह्यैः काव्यैर्वाङ्मयमूर्त्तिस्वयं साक्षात् ॥
अस्मादेवालयतो नेपालस्येतिहासधर्मौ च ।
गीतं शिल्पं वास्तु ज्ञेयं सामाजिकं चान्यत् ॥
प्रमुदितमानसपद्मैरस्मिन् राज्याभिषेकसंहर्षे ।
अभिनन्द्य राजराजं पुस्तकसूच्या उपक्रमः क्रियते ॥

श्री चौ० फत्यजङ्गसाहस्य
अध्यक्षतायां—
बुद्धिसागरप्रभृतिभिः
*वीरपुस्तकालयस्यकर्मचारिभिः*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

# भूमिका

अयं खलु " वीरपुस्तकालयः " नेपालराजकीयपुस्तकालयः, वीरपुस्तकालय इति तु नामधेयं वर्तमानभवनस्य श्री ३ महाराजनेपालप्रधानामात्यवीरशम्शेरवर्मणः समये निर्मितत्वेन तदा प्रभृत्येव प्रचलितम्। अत एव अस्मिन् पुस्तकालये गोरक्ष-तनहु-लमजुङ्ग-पाल्पाप्रभृतिराजभवनस्थान्यपि पुस्तकानि समागतानि। श्री ५ महाराजाधिराजेन पृथ्वीनारायणवर्मणा तद्वंशजैश्च राष्ट्रविवृद्धिसमकालं पुस्तकालयादिसांस्कृतिकक्षेत्राणामपि वृद्धिः संपादिता। सोऽयमीदृशः पुस्तकसंग्रहः नेपालेतिहासस्य प्रारम्भसमयतः किञ्चित्कालपूर्वपर्यन्तं राजप्रासादे एव स्थापित आसीत् अतएव " दर्बारलाइब्रेरी " इति च व्यवह्रियते। अत एव अस्य पुस्तकालयस्य पर्यालोचनायां क्रियमाणायामासप्तद्विसहस्राब्दीवर्षमध्यगतो नेपालेतिहासः सुस्पष्टं संकलयितुं शक्यते, अनेनैव च हेतुनास्य पुस्तकालयस्य यूरोप—अमेरीकादिषु सुदूरेष्वपि देशेषु प्रसिद्धिरस्ति अत एव नेपालमागता भारतीया वैदेशिका अपि विद्वांसोऽस्य पुस्तकालयस्य दर्शनं मुख्यत्वेन कुर्वते दृष्ट्वा चात्मानं कृतार्थं मन्यन्ते। यथाः— भारतीयः सुप्रसिद्धो वञ्चनकविः सपरिवारो नेपालमागतो लिखति—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तकालय देखकर अहो भाग्य हुवा यहाँ बहुत मूल्यवान संपत्ति सुरक्षित है । इसमे नेपालके प्राचीन गौरवका आभास मिलता है मेरी कामना है कि भविष्यमे भी नेपाली प्रतिभा उसे अधिक संपन्न करें ।

पच्चन
क्राइस्टरोड
प्रयाग

पटनाविश्वविद्यालयस्य प्राचीनेतिहासस्य प्राध्यापको वासुदेवोपाध्यायो लिखतिः—

मैने इस प्रकारके हस्तलिखितसंग्रहालयका पहले अवलोकन नही किया था ऐसे भी यहाँ ग्रन्थ है जो अत्यन्त प्राचीन है । इसके अधिकारी वर्ग प्रशंसाके पात्र हैं जिन्होने लगन तथा परिश्रमके साथ ग्रन्थोंकी रक्षा की है तथा कररहे हैं ।

वासुदेव उपाध्याय
प्रोफेसर प्राचीन इतिहास
पटनाविश्वविद्यालय
८।८।५५

शर्मण्यदेशीयः प्रोफेसर हैलमुत हाफ़मैन महोदयो लिखति—

The is library has been to me like a real jewal. I hope to come again for further study.

Kilseusgeorgroster. 15
Munchan 13.
Germany

पुनर्दर्शनाय
Halment Halfm
2|5|54.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवमेव बहुभिर्भारतीयैः पाश्चात्यैरमेरीकानिवासिभिरन्यैश्चास्य पुस्तकालयस्य बहु प्रशंसा कृताऽस्ति येषां प्रकाशो यदि क्रियेत महान् समयो व्ययश्च भवेत् ।

अस्मिन् पुस्तकालये प्राय आसप्तविंशा विविधाः प्राचीना लिपयः सन्ति यासां क्रमविकासानुसंधाने क्रियमाणे लिपीनां विकासक्रमो व्यक्तो भवति । ईदृशं महिमानं बिभ्रति पुस्तकालये प्राचीनपरिपाट्यां निर्मिता विंशद्वा बृहती हस्तलिखिता पञ्जिकाऽस्ति । राजकीयनियमानुसारिणी राजप्रत्ययिताधिकरणमुद्राङ्कितान्या च पञ्जिकाऽस्ति । तथा म०म०हरप्रसादशास्त्रिणा संपाद्य मुद्रिताऽन्या च पञ्जिकास्ति । पूर्वयोर्द्वयोः पञ्जिकयोः पुस्तकप्राप्तिसौकर्यं नास्ति, म०म०हरप्रसादशास्त्रिसंपादितायां पञ्जिकायां यद्यपि पुस्तकप्राप्तिसौकर्यं वर्तते तथापि तत्र कतिपयानामेव पुस्तकानां पञ्जिका उल्लिखिता न सर्वेषां यानि खलु पुस्तकानि शास्त्रिमहोदयस्य दृष्टौ आरूढानि यानि च शास्त्रिमहोदयेन पुस्तकत्वेन गणितानि तेषामेव पञ्जिकारचनायां प्रयत्नः कृतो दृश्यते नान्येषाम् ।

अस्माभिरागत्य पर्यालोचनायां क्रियमाणायां नवीनप्रणाल्या एका सर्वेषां पुस्तकानां पञ्जिका निर्मातव्येति महती आवश्यता दृष्टा तदनुसारमपेक्षितं कार्यं संपादयितुं सर्वे सोत्साहाः प्रयत्नशीलाश्च स्मः । कार्यं प्रचलितं चास्ति एवं च प्रवर्तमाने पञ्जिकाकार्ये मध्येसमयं श्री ५ मन्महाराजाधिराजस्य महेन्द्रवीरविक्रमशाहदेवस्य शुभराज्याभिषेकोत्सवः समापतितः अस्मिन् समस्तनेपालीयानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हर्षास्पदे मङ्गलमये समये अस्य पुस्तकालयस्य पुस्तकानां प्रकाशयिष्यमाणायाः पञ्जिकायाः किमपि प्रतीकं प्रकाश्यते।

अस्मिन् पुस्तकालये विश्वप्रसिद्धं प्राचीनतमं वाल्मीकीयरामायणमस्ति यत् खलु वि०सं० १०७५ तमे वत्सरे प्राचीनदेवनागरीलिप्यां लिखितमस्ति बालकाण्डत आरभ्य उत्तरकाण्डपर्यन्तं प्रायः समग्रं वर्तते यस्य च समग्रं चित्रं बरौदाप्राच्यविद्यामन्दिरस्य डाइरेक्टरेण गृहीतम्। इतोऽप्यतिप्राचीनं स्कन्दपुराणस्याम्बिकाखण्डं वर्तते। अस्मात्पुस्तकालयादन्यत्र यस्य सत्तायाः संभावना नास्ति। अगस्त्यसंहितानामधेयं चान्यद् विचित्रं रत्नशास्त्रमस्ति यत्र रत्नविषये महद् वाङ्मयारम्भणं वर्तते मुरारिमिश्ररचितम् एकादशाध्यधिकरणं नाम दार्शनिकक्षेत्रे कौतूहलकारि पुस्तकं चात्र वर्तते। अस्य खलु प्रतिलिपिः डाक्टरगङ्गानाथझा महोदयेन काशीस्थराजकीयसंस्कृतपुस्तकालयसरस्वतीभवनस्य कृते गृहीता एवमेव चान्यान्यपि नानाविधानि ग्रन्थरत्नान्यत्र सन्ति।

विद्याप्रियेण वर्तमानेन श्री ५ मन्महाराजाधिराजेन महेन्द्रवीरविक्रमशाहदेवेन लक्षाधिकमूल्येन कस्य च न महतः पुस्तकालयस्य क्रयणमचिरादेव करिष्यते इति च विज्ञाय श्री ५ मन्तं महाराजाधिराजं सबहुमानमभिनन्दयामः, एवमेव चोत्तरोत्तरमयं पुस्तकालयो वर्धिष्णुः सन् सर्वलोकोपकाराय भविष्यति।

अस्य भवनस्य निर्मातारं श्री ३ महाराजवीरशम्शेर वर्माणं तथा बहूनि पुस्तकानि प्रदाय पुस्तकालयस्य वृद्धिं कुर्वाणं श्री ३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाराजभीमशम्शेरवर्माणं तथो च चीनाक्षरपुस्तकप्रदातारं भू०पू०अर्थमन्त्रिणं सुवर्णशम्शेरवर्माणं च भूयोभूयोभिनन्दयामः । यस्य खलु शिक्षाप्रियस्य महाविदुषः सद्भावना पूर्णसौजन्येनेदं प्रकाशितं तस्मै श्रीकेसरशम्शेरवर्मणे भूषश्च भूरिभूरिशतशोभिन्दनं समर्प्यः अस्य पुस्तकालयस्य सुव्यवस्थार्थं त्रिचनुरान् पण्डितान् त्रिचतुराँल्लेखकाँश्च नियुज्य स्वमुदारं दर्शयन्तं श्री ३ महाराजमोहनशम्शेरवर्माणं तत्र कर्मणि अनुमतिदातारं नरहरिनाथं योगिनं सोत्साहं कर्म कुर्वाणं श्री चौ. फत्यजङ्गपराक्रमशाहं पुस्तकालयध्वजं चाभिनन्द्य विरमति ।

वि सं. २०१३।१।२०।४ शुभम् । पं० बुद्धिसागरशर्मा
पुस्तकालयस्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# नेपालराजकीयपुस्तकालयस्य

## सूचीपत्रप्रतीकम्

## कालोत्तरतन्त्रम्

विषयाङ्कः— ११२ क्रमिकाङ्कः—प्र. ८६

अन्त्यखण्डितम्। ग्रन्थकारः— ईश्वरः। पत्रम्— ताडपत्रम्। पत्रसंख्या— २८७। प्रतिपत्रं प्रायः ६ पङ्क्तयः। ग्रन्थसंख्या—६२००। तिर्यङ्मानी पार्श्वमानी च १४×३।

आरम्भः—

? ॐ नमः परशिवाय ॥ कार्त्तिकेय उवाच ॥ सर्वज्ञाय नमस्तुभ्यं सर्वकर्तर्नमोऽस्तुते। अविलुप्तस्वरूपाय चिन्मात्राय नमोस्तुते ॥१॥ अविलुप्तस्वरूपाय चिन्मात्राय नमोऽस्तुते ?।. प्रमाणातीतदेहाय नमः शान्तायतेजसे ॥ सत्संवित्करणातीतहानादानान्तरात्मने ॥

समाप्तिः— खण्डिता

पुष्पिकावाक्यानि:—

इति कालोत्तरेमहातन्त्रे प्रथमः पटलः

इति कालोत्तरेमहातन्त्रे प्रासादोद्धारपटलः

इति कालोत्तरे निष्कलमन्त्रपटलः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कालोत्तरे शून्यमन्त्रोद्धारपटलः

इति कालोत्तरे फलाढ्यमन्त्रपटलः

इति खमलंकृतमन्त्रपटलः

इति कालोत्तरे क्षपणाख्यमन्त्रोद्धारपटलः

इति कालोन्तरे महातन्त्रे क्षयमन्त्रसंज्ञके व्योमव्यापिन ?
मन्त्रोद्धारपटलः

इति कालोत्तरे कण्ठोष्ठमन्त्रोद्धारपटलः

इति कालोत्तरे सन्ध्यापटलः

इति कालोत्तरे विधिस्नानपटलः

इति कालोत्तरे भस्मस्नानविधिपटलः

इति कालोत्तरे अञ्जनविधिपटलः

इति कालोत्तरे नित्यार्चान्हिकपटलः

इति कालोन्तरे कुण्डोत्पादकरणपटलः

इति कालोत्तरे दीक्षाधिवासपटलः

इति कालोत्तरे मुद्रापटलः

इति कालोत्तरे दीक्षाधिवासपटलः

इति कालोत्तरे सामान्याहुतिपटलः

इति कालोत्तरे महातन्त्रे सामान्यसर्वाध्वपटलः

इति कालोत्तरे दीक्षापटलः

इति कालोत्तरे समयपटलः

इति चण्डयोगपटलः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कालोत्तरे आचार्याभिषेकपटलं ( : )

इति कालोत्तरे महातन्त्रे समयीपुत्रकसाधकाभिषेक-पटलः

इति कालोत्तरे महातन्त्रे शिवभेदपटलः

इति कालोत्तरे महातन्त्रे तन्त्रोत्पत्तिव्याख्यापटलः

इति कालोत्तरे महातन्त्रे शिवतत ( ट् ) वर्णनपटलः

इति कालोत्तरे व्याख्यापटलः

इति कालोत्तरे गणपति पूजापटलं ( : )

इति कालोत्तरे महातन्त्रे वागीश्वरीपूजापटलं ( : )

इति कालोत्तरे महातन्त्रे मन्त्रपटलं ( : )

इति कालोत्तरे महातन्त्रे अस्त्रवर्तनपटलं ( : )

इति कालोत्तरे महातन्त्रे अस्त्रयागपटलं ( : )

इति कालोत्तरे महातन्त्रे गुह्यागपटलं ( : )

इति कालोत्तरे महातन्त्रे अस्त्रपटलं ( : )

इति कालोत्तरे महातन्त्रे पाशुपतास्त्रपटलं : ( : )

इति कालोत्तरे महातन्त्रे महास्त्रकथनपटलं ( : )

इति कालोत्तरे महातन्त्रे शिवशान्तिपटलं ( : )

इति कालोत्तरे महातन्त्रे अघोरकल्पशान्तिपटलं ( : )

इति कालोत्तरे महातन्त्रे रुद्रशान्तिपटलं ( : )

इति कालोत्तरे महातन्त्रे आश्रमपटलं ( : )

इति कालोत्तरे महातन्त्रे गोचरपटलं

इति कालोत्तरे महामन्त्रे सप्रयपटलं

इति कालोत्तरे महामन्त्रे गुरुविचारपटलं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कालोन्तरे अंशककाललक्षणपटलम्
इति कालोन्तरे महातन्त्रे गौरीयागपटलम्
इति कालोन्तरे महातन्त्रे मृत्युञ्जयपटलम्
इति कालोन्तरे महतन्त्रे व्रतेश्वरपटलम्
इति कालोन्तरे महातन्त्रे गुरुयागपटलम्
इति कालोन्तरे महातन्त्रे अनध्याय न ? पटलम्
इति कालोन्तरे महातन्त्रे पवित्रारोहणपटलम्
इति कालोन्तरे महातन्त्रे प्रायश्चित्तपटलम्
इतिकालोन्तरे महातन्त्रे अक्षसूत्रमालापटलम्
इति कालोत्तरे महातन्त्रे घण्टालक्षणपटलम्
इति कालोत्तरे महातन्त्रे पुष्पपटलम्
इति कालोत्तरे महातन्त्रे अष्टपुष्पिकापटलम्

( इति कालोत्तरे महातन्त्रे ब्रम्हकुर्चविधिः )
इति कालोत्तरे महातन्त्रे व्रतयागपटलम
इति कालोत्तरे महातन्त्रे फाल्गुनकृष्णचतुर्दशी

( इति कुमारव्रतम् ) ( इति मातृव्रतम ) ( इति काम-व्रतम ) ( इति गौरीव्रतम् )

( इति सूर्यव्रतम् ) ( इति सोमव्रतम् ) ( इति भूमि-व्रतम् ) ( इति देवदेवव्रतम् ) ( राजराजेश्वरव्रतम् )

( इति महाव्रतम् ) ( इति विश्वरुपव्रतम् )

( इति मन्त्रमेरुदानं समाप्तम्
इति कालोत्तरे महातन्त्रे व्रतपटलम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कालोत्तरे महातन्त्रे तत्वोत्पत्तिपटलम्
इति कालोत्तरे महातन्त्रे साधनासंवित्तिपटलम्
इति कालोत्तरे महातन्त्रे कालज्ञानपटलम्
इति कालोत्तरे महातन्त्रे नाडीचक्रोद्देशपटलम्
इति कालोत्तरे महातन्त्रे कालाधिकरणपटलम्
इति कालोत्तरे प्रसादप्रणावव्याप्तिपटलम्
इति कालोत्तरे महातन्त्रे प्रत्यक्षयजनपटलम्
इति कालोत्तरे महातन्त्रे लिङ्गोद्धारपटलम्
इति कालोत्तरे महातन्त्रे उत्क्रान्त्या ? अन्त्येष्टिपटलम्
इति कालोत्तरे महातन्त्रे अन्तर्यागपटलम्
इति कालोत्तरे महातन्त्रे कमण्डलुपटलम्
इति कालोत्तरे महातन्त्रे अन्त्येष्टिमृतोद्धारपटलम्
इति कालोत्तरे महातन्त्रे श्राद्धपटलम्
इति कालोत्तरे महातन्त्रे लिङ्गवर्णनपटलम्
इति कालोत्तरे महातन्त्रे लिङ्गपटलम्
इति कालोत्तरे महातन्त्रे प्रतिमापटलम्
इति कालोत्तरे महातन्त्रे मानभैरवरचनापटलम्
इति कालोत्तरे महातन्त्रे पीठपटलम्
इति कालोत्तरे महातन्त्रे वास्तुयागपटलम्
इति कालोत्तरे महातन्त्रे प्रासादलक्षणपटलम्
इति कालोत्तरे महातन्त्रेऽधिवासनपटलम्
इति कालोत्तरे महातन्त्रे अधिवासनपटलम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कालोत्तरे महातन्त्रे स्थापनपटलम्
इति कालोत्तरे महातन्त्रे जीर्णोद्धारपटलम्
इति कालोत्तरे महातन्त्रे वृषभलक्षणपटलम्
इति कालोत्तरे महातन्त्रे योगपटलम्
इति कालोत्तरे महातन्त्रे उद्घाटोद्देशपटलम्
इति कालोत्तरे महातन्त्रे जपपटलम्
इति कालोत्तरे महातन्त्रे ब्रम्हाण्डवर्णनंनाम पटल:
इति कालोत्तरे युक्तिवर्णनंनाम पटल:
इति कालोत्तरे महातन्त्रे मन्त्रार्पणपटलम्
इति कालोत्तरे महातन्त्रे क्षत्रग्रहणपटलम्
इति कालोत्तरे महातन्त्रे शक्तिवर्णनपटलम्

इति कालोत्तरे महातन्त्रेपूर्वसेवापटलम्

इत उत्तरे पटलेशान्तिकपौष्टिककर्मकालादिनिरूप्य, अन्तर्धानविद्याचौरज्ञानभूतविद्रावणवाक्स्तम्भादि निरूपण पर्यन्तो ग्रन्थोऽस्ति तदनन्तरं खरिड़तः । ग्रन्थोऽयंशैवानां बहूपयोगी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# ज्यौतिषम्

## अब्दप्रबोधो वा भोजदेवसङ्ग्रहः

विषयाङ्कः— १५ क्रमाङ्कः— प्र० १६९२

पञ्जिकासहितः, ग्रन्थकारः—दामोदरः, ताडपत्राणि, भुजिमोलिपिः, पङ्क्तयः—!, आकारः १७½ × १३/८, ग्रन्थसंख्या १४००, पत्रसंख्या !

आदिवाक्यम्—

ॐ नमः सर्वज्ञाय ॥ सर्वज्ञमद्वयमनादिमनन्तमीशं मूर्ध्नाभिवन्द्य वचनैर्विविधैर्मुनीनाम् । आब्दप्रबोध मुदयञ्च मुदानिदानं दामोदरो व्यरचयद्गुणिनः क्षमञ्चम् ॥ करबदरसदृशमखिलं लिखितमिव तौनिषिक्तमिव हृदये । सचराचरन्त्रिभुवनं यस्य स जीयाद्वराहमिहरमुनिः ॥ स्वल्पाभिधेयविपुलाभिधानबहुसङ्ग्रहैरजातमुदः । लघुमलघुवाक्यसङ्ग्रहमवदधतु सुपद्यगद्यमिमम् ॥ श्रीभोजदेवनृपसङ्ग्रहसर्वसारं सारञ्च सङ्ग्रहगतस्य वराहसाम्यात् ।

पुष्पिका—

इति कालविभागः । इति वर्षादिफलम् ।
इति सपरिकरणनक्षत्रचिन्ता । इति राशिचिन्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति तिथिकरणचिन्ता । इति योगचिन्ता ।
इति संग्रहतारकाचिन्ता । इति संक्रान्तिचिन्ता ।
इति शुद्धिचिन्ता । इति वालबन्धः ।

इति गर्भाधानविधिः । इति पुंसवनसीमन्तकर्मणी ।
इति रिष्टचिन्ता । इति शशिरिष्टभङ्गः ।
इति रिष्टभङ्गः । इति जातकविधिः ।
इति वृद्धिश्राद्धम् । इति नामकरणम् ।
इति पूर्णभक्षणम् । इति निष्क्राशनम् ।
इति अन्नप्राशनम् । इति नवान्नभक्षणः ।
इति कर्णवेधः । इति विद्यारम्भः ।
इति व्रतबन्धः । इति वन्हिपरिग्रहः ।
इति धनुर्वेदः । इति प्रश्नोद्देशः ।
इति विवाहवर्षशुद्धिः । इति देशाचारशुद्धि ।
इति रविविशुद्धिः । इति गुरुशुद्धिः ।
इति चन्द्रशुद्धिः । इति अष्टवर्गचिन्ता ।
इति मासानिचिन्ता । इति घटनविधिः ।
इति हस्तोदकम् । इति नववधूयात्रा ।
इति प्रतिशुक्रादिचिन्ता । इति सिंहबृहस्पतिचिन्ता ।
इति शङ्खादिपरिधानम् । इति परिधानम् ।
इति यात्रायांवारचिन्ता । इति यात्रायांनक्षत्रादिचिन्ता ।
इति यात्रायांलग्नादिचिन्ता । इति ललाटियोगचिन्ता ।
इति यात्राभङ्गयोगः । इति व्यतीपातादिचिन्ता ।
इति प्रस्थानविधिः । इतिवास्तुविद्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति गृहाद्यर्घविधिः । इति गृहप्रवेशः ।
इति प्रतिष्ठाविधिः । इति कूपखननविधिः ।
इति वृक्षारोपणपुण्यम् । इति कृषिचिन्ता ।
इति भैषज्यभक्षणम् । इति गदमुक्तिस्नानम् ।
इति वस्त्रप्रक्षालनम् । इति दोलाद्यारोहणम ।
इति करिदक्षकल्पनम् । इति गोचालनादिविधिः ।
इति श्रवणादिचिन्ता । इति तैलाद्यभोगकलम् ।
इति क्रयविक्रयचिन्ता । इति नौकादिशिल्पक्रिया ।
इति परीक्षादेवस्पर्शनविधिः । श्रीभोजदेवसङ्ग्रहः समाप्तः ।

अन्तिमवाक्यम्—

तास्वेव श्रावणे मासि यदि वर्षति वर्षति ॥ प्रतिपद् बहुलायां चित्रवृष्टिस्तु ॥ वर्षस्य गर्भलक्षणम् ॥

समयः— शाके संवत् १२६७ फाल्गुणशुक्लद्वितीयां रेवतीनक्षत्रे शुक्रदिने शुभलग्ने लिखितमिदं पुस्तकं राज्ये श्रीश्रीजयार्जुनदेवस्य ।

## काव्यप्रकाशटीका दर्शनाख्या

विषयाङ्कः—० क्रमिकाङ्कः—च

टीकाकारः—०। मध्यदेशीयं कागजम्, देवनागरी लिपिः, पङ्क्तयः १४।१५ आकारः ६½×४½, ग्रन्थसंख्या १२२५, पत्रसंख्या ५४ ।

आदिवाक्यम् ।

श्रीसिद्धिविनायकाय नमः ॥ ॥ प्रणम्य शारदां काव्यप्रकाशो बोधसिद्धये ॥ पदार्थविवृतिद्वारा स्वशिष्ये-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्यः प्रदर्श्यते ॥ अथात्र शिवशक्तिसदाशिवेश्वरशुद्ध-विद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृतिबुद्धिमनोहं-कारश्रोत्रत्वक्चक्षुर्जिव्हाघ्राणवाक्पाणिपायूपस्थशब्दस्पर्श-रूपरसगंधाकाशवायुवन्हिसलिलभूमयः षट्त्रिंशत्तत्वानि वेद्यभूमिपतितानि संविद्रूपं तु सप्तत्रिंशं तदपि उपदे-शादौ वेद्यमुपचारेणेति सर्वथा यदवेद्यं स्वतन्त्रं तदष्टात्रिंशं तान्येतानि सर्वतत्वा न सर्वत्र स्थितानि ।

*द्वितीयपत्रे ।*

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति ग्रन्थस्य काव्यप्रकाशापरनाम्नः शिवतत्त्व-प्रकाशस्यारम्भचिकीर्षायां विघ्नास्तत्प्रकाशप्रतिबन्धकाः स्वस्वरूपख्यातेर्भेदप्रथाकारणं मायादयः पाशभूताः तेषां विघाताय विशिष्टो घातः पुनरनुत्पादादत्यन्ताभावः तदर्थं समुचिता मायानिरोधनाय ममोघवीर्या चासौ इष्टा इच्छा शक्तिप्रथमस्पन्दनभूता चासौ देवता विश्वस्य वेद्यवर्गस्य क्रीडाविजिगीषाव्यवहारसाधनीभूता शुद्धविद्या तां परा-मृशति शिष्यानुग्रहार्थं संमुखीकरोति ।

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

पुष्पिकाः—

इति श्रीकाव्यदर्शने शितिकण्ठविवोधने [illegible] र्शनं प्रथमम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति श्रीकाव्यप्रकाशदर्शने शितिकण्ठविबोधनाख्ये व्यंजनोद्देशो द्वितीयोल्लासः समाप्तः ।

" " " अर्थव्यंजकतालक्षणस्तृतीयः ।

" " " चतुर्थ उल्लासः समाप्तः ।

अयं ग्रन्थ एतावत्पर्यन्त एवात्रास्ति

# नाटकम्

## रामायणनाटकम्

विषयाङ्कः- १४ क्रमाङ्कः- प्र. ३४६

रामायणनाटकम, नेवारभाषामयम, ग्रन्थकार :— रणजिद्मल्लदेवः, नेपालीयकागतम , नैवारी लिपिः , आकारः १७×५, पङ्क्तयः १०, ग्रन्थसंख्या ७८०। पत्रसंख्या २००। अस्य नाटकस्य अध्ययनेन रणजिद्मल्लस्य समये नेपाले सामाजिकी अवस्था कीदृशी आसीदिति ज्ञातुं शक्यते ।

आदिवाक्यम् :—

श्री ३ नृत्यनाथाय नमः ॥ आदौ नान्दिश्लोकः ॥ सानन्दं चन्द्रचूडस्सुरगणमहितो भक्तरक्षाप्रवीणः कान्ताव्यामिश्रदेहो नवरसकलितो द्वीपिचर्म्मोत्तरीयः । सृष्टि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थित्यन्तकर्ता फणिपतिवलयः कर्म्मसाक्षी महेशः स्मेरास्यः शूलपाणिर्नटवरविदितः पातु वो नृत्यनाथः ॥ ॥ ततो नान्दिगीतं ॥ ॥ गलफणिमा ॥ नान्दिमालव ॥ ज० थ० ए० प० प्र० अ० चो० ॥ शिरहि शशि गाँगधारा गलहि रुण्डमाला ॥ ए ॥

पुष्पिका—

इति प्रथमोऽङ्कः । एवमेव द्विचत्वारिशाङ्कपर्यन्ताः पुष्पिकाः सन्ति ।

अन्तिमवाक्यम्—

कुशआशीर्वादश्लोकः ॥ खे यावत्पुष्पवन्तौ मलयगिरिवरो मन्दराद्रिः सुवेलः स्वर्णाद्रिः कूर्म्मशैलः सुरवरनगरी मेदिनी वारिधिर्व्वै । तावत्पुत्रैश्च पौत्रैस्सममवतु महीं भानुवंशावतंशो विख्यातो दानशीलो नृपवररणजिच्छौर्यगांभीर्ययुक्तः ॥ हेलोकाः तपनकुलकमलप्रकाशनैकदिनकरश्रीश्रीजयरणजिद्मल्लदेवानां सप्ताङ्गराज्यवृद्धिरस्तु ॥ सर्वे तथास्तु ॥ ॥ आरती ॥ पञ्चम ॥ चो ॥ ईभव अथिरेत्यादि ॥ मेपु १२ ॥ इति श्रीश्रीजयरणजिद्मल्लदेवमहाराजाधिराजपरमभट्टारकनरेन्द्रवि ( र ) चिते वाल्मिकरामायणनाटके त्रिचत्वारिंशत्यङ्कस्समाप्तः ॥ ४३ ॥ ॥ शुभमस्तु ॥ संवत् ८८५ चैत्र शुदि १० धुनका ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# व्याकरणम्

## प्रक्रियाकौमुदी

क्रमिकाङ्कः—प्र. १०७६

विषयाङ्कः—

द्विरुक्तान्ता, ग्रन्थकारः—रामचन्द्रः। लिपिः— मैथिली। पत्रम्—ताडपत्रम्। पत्रसंख्या—१२१। प्रतिपत्रं प्रायः पङ्क्तयः। ग्रन्थसंख्या ३०००। तिर्यङ्मानी पार्श्वमानी च १५ + ३½। लेखनसमयः— लक्ष्मणसं० ५५८।

आरम्भः—

ॐगणेशाय नमः ॥ श्रीमद्विठ्ठलमानम्य पाणिन्यादिमुनोन् गुरून्। प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम्॥

अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषशर्। हल्। इति माहेश्वराणि सूत्राणि। हकारो द्विरुपात्तोऽयमटि शल्वपि वाञ्छता॥ अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति॥ उपदेशेऽजनुनासिक इत्। उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः।

समाप्तिः—

कर्मव्यतीहारे सर्वनाम्नो द्वे स्तः। समासवच्च बहुलम्। यदा न समास्तदा प्रथमैकवचनं पूर्वपदस्य द्वितीया-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्येकवचनात्तत्वं परपदस्य । अन्योन्यं विप्रा नमन्ति । अन्योन्येन कृते । अन्योन्यस्मै । अन्योन्यस्मिन् साधवः । एवं परस्परम् । अत्र विसर्जनीयस्य सः कस्कादित्वेन ज्ञेयः । बहुलोक्तेरेतयोर्नित्यसमासः । इतरशब्दस्य नित्यं समासवदिति ज्ञेयम् । इतरेतरम् । स्त्रीनपुंसकयोरुत्तरपदस्य चामभावो वाच्यः । अन्योन्यम् , परस्परम्, इतरेतरम्, इमाः स्त्रियो भोजयन्ति कुलानि वा । पक्षे अन्योन्यमित्यादि पूर्ववत् । इति द्विरुक्तिप्रक्रिया समाप्ता । इति श्रीरामचन्द्रभट्टाचार्यविरचितायां प्रक्रियाकौमुद्यां सुबन्तसमाप्तिः । ल०स० ५५८ कार्तिकशुक्लपञ्चदश्यां बुधौराम ? श्रीदामोदरशर्मणा लिखितैषा स्वस्ति शुभमस्तु ।

*पुष्पिकावाक्यम्—*

इति सन्ध्युपयोगिसंज्ञाकरणम् । इत्यचसन्धिः ।
इति हल्सन्धिः । इति विभक्त्यादिसंधिः ।
इत्यजन्ताः पुंलिङ्गाः । इत्यजन्ताः स्त्रीलिङ्गाः ।
इत्यजन्ताः नपुंसकलिङ्गाः । इति हलन्ताः पुंलिङ्गा ।
इति हलन्ताः स्त्रीलिङ्गाः ।
इति हलन्ता नपुंसकलिङ्गाः । इत्यव्ययानि ।
इति स्त्रीप्रत्ययः । इति कारकपटलः समाप्तः ।
इत्यव्ययीभावः । इति तत्पुरुषः ।
इति बहुव्रीहिः । इति समासान्तः ।
इति तद्धितप्रक्रिया समाप्ता । इति द्विरुक्तप्रक्रिया समाप्ता ।
*इति श्रीरामचन्द्रभट्टाचार्यविरचितायां प्रक्रियाकौमुद्यां सुबन्तं समाप्तम् इति ॥*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# एकादशाध्यधिकरणम् ( मीमांसा )

विषयाङ्कः— क्रमाङ्कः— प्र० १०७६

ग्रन्थकारः— म.म.मुरारिमिश्रः, लिपिः— मैथिली, पत्रम्— ताडपत्रम्, पत्रसंख्या— ६, प्रतिपत्रंप्रायः ६ पङ्क्तयः, ग्रन्थसंख्या—१५०, तिर्यङ्मानी पार्श्वमानी च १२$\frac{3}{4}$×२, लेखसमयः— आनुमानिकः— ल० सं ५५८ ।

आरम्भः—

ॐनमः शिवायः ॥ प्रयोजनाभिसंधानत्वात्, बाधाभ्युच्चयलक्षणां वर्तयिष्यामः । तत्र के चित् कार्यतन्त्रतामन्ये प्रयाजादिपदानुतन्त्रतामन्येनुष्ठानतन्त्रतामध्यायानु ? इत्याहुः । तत्रादौ तन्त्रावापस्वरूपमेव विवेचनीयम् । यदि सकृत्वमेव तन्त्रत्वं तदा सोमे दीक्षणीयादीनां तन्त्रत्वं स्यात्, अथानेकोपकारकत्वे सत्यने ? (त्ये) कत्वं तर्हि प्रसङ्गेऽपि तन्त्रत्वप्रसङ्गः, अनेकशेषत्वे सत्येकप्रनेकोपकारकं तन्त्रमितिचेत्न पुरोडाशकपालेन व्यभिचारात्, अनेकोद्देशेनानुष्ठानसकृत्वं तन्त्रत्वमिति चेत्न कथं तर्हि कार्यानुष्ठानयोस्तन्त्रत्वं स्यात् । नह्यनुष्ठानेऽनुष्ठानान्तरमस्ति, अनुष्ठानानेकत्वस्य सकृत्वं तन्त्रत्वमनुष्ठानस्यैवोच्यते नत्वन्यस्य करिण इव कलभ इति चेत् न तर्हि पक्षविकल्पन्यायेन निर्णय इति युक्तम् । अन्यस्य तन्त्रपदेनैवाभिधानात् न च कलभन्याये प्रमाणमस्ति । यस्यैवानुष्ठानं तस्यैव तन्त्र-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वं युक्तम्, तथा च प्रयाजादितन्त्रताध्यायानु, इत्येव पञ्जिकायामुक्तं यस्तु प्रयोगतन्त्रमिति व्यवहारः स प्रयोग-प्रयोज्ययोरदूरविमर्षात्, कार्यस्वानुष्ठानसंभक्तिताविरहात्-कथं तन्त्रत्वं तदस्य ... ...

*समाप्तिः—*

विकृतौ भेदनातिदेशो भवति अन्यत्र प्रतिकरणं भेद एवास्य एकप्रकरणशास्त्रानुतयाऽनेकत्वमुच्यते सांनिपत्यारादु पकारकाभ्यां तु प्रतिकरणं भिन्ना एवोपकारविशेषा जन्यन्ते यथा च प्रकृतिविकृत्योरुपकारव्यक्तिभेदेपि स एवोपकार इत्युच्यते यथा प्रतिकरणं भेदेप्येक एवोपकार इति । इति श्रीमिश्रमहामहोपाध्यायश्रीमुरारिकृतौ एकादशाद्यधिकरणं समाप्तमिति ॥ ॥ महोपाध्यायश्रीरत्नाकरात्मजेनवाग्दे-वताराधनपरेण श्रीहरिकरेण लिखितमीदं पुस्तकम् ॥

# शिला-लेखः

*विषयाङ्कः—* *क्रमिकाङ्कः—*

भ.पु.वि.सं. ६८६, शिवदेवेन राज्ञा स्थापितः पुण्य-वत्याम् खुपासोमार्गस्याधस्ताद्वृत्तस्याधो भूमौ निखातः शिलालेखः ।

१ ॐस्वस्ति मानगृहादपरिमितगुणसम्पत्तिच्छविकुलान-न्दकरो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२ भट्टारकमहाराजश्रीशिवदेवः कुशली कूर्प्पांसोग्रामनिवा-
३ सिनः प्रधानपुरस्सरान्कुटुम्बिनः कुशलमभिधाय समाज्ञा-
४ पयति विदितमस्तु वो यथानेन स्वगुणमणिमयूखालोक-
५ ध्वस्ताज्ञानतिमिरेण भगवद्भवपादपङ्कजप्रणामानुष्ठा -
६ नतात्पर्य्योपात्तायतिहितभयसा स्वभुजयुगबलोत्खातानि -
७ खिलवैरिवर्गेण श्रीमहासामन्तांशुवर्म्मणा मां विज्ञाप्य
मदनु-
८ ज्ञातेन सता युष्माकं सर्व्वाधिकरणाप्रवेशेन प्रसादः कृतः
९ समुपस्थितविचारणीयकार्य्येषु स्वतलस्वामिनैव यूयं विचा
१० रणीयाः सर्व्वकार्ये सदैकमेव वो द्वारं द्वारोद्घाटन-
कैलास-
११ कूटयात्रयोश्च भवद्भिः प्रत्येकं पञ्चाशज्जातिशुक्लमृत्ति-
कादेया-
१२ श्चिरस्थितये चास्य प्रसादस्य शिलापट्टकेन प्रसादः
कृतस्त-
१३ देवं वेदिभिरस्मत्पादप्रसादोपजीविभिरन्यैर्व्वा नायं
प्रसादो-
१४ न्यथा करणीयो यस्त्वेतामाज्ञामुत्क्रम्यान्यथा कुर्य्या-
त्कारयेद्वा त-
१५ महं मर्य्यादाभङ्गकारिणमतितरान्न मर्षयिष्यामि भाविभिर-
१६ पि भूपतिभिर्द्धर्म्मगुरुभिर्गुरुकृतप्रसादानुवर्तिभिरिय -
१७ माज्ञा सम्यगनुपालनीयेति समाज्ञापना ॥ दूतकश्चात्र
१८ देशवर्म्मगोमी संवत् अत्र (५३) चैत्रकृष्णपक्षेतिथौ
१९ पञ्चम्याम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुद्रकः— " अन्नपूर्णा प्रेस " असन ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection